अर्जुन उवाच ।

arjuna uvāca |

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।

पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १०.१२ ॥

paraṁ brahma paraṁ dhāma pavitraṁ paramaṁ bhavān |
puruṣaṁ śāśvataṁ divyamādidevamajaṁ vibhum || 10.12||

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।

असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १०.१३ ॥

āhustvāmṛṣayaḥ sarve devarṣirnāradastathā |
asito devalo vyāsaḥ svayaṁ caiva bravīṣi me || 10.13||

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।

न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १०.१४ ॥

sarvametadṛtaṁ manye yanmāṁ vadasi keśava |
na hi te bhagavanvyaktiṁ vidurdevā na dānavāḥ || 10.14||

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।

भूतभावन भूतेश देवदेव जगत्पते ॥ १०.१५ ॥

svayamevātmanātmānaṁ vettha tvaṁ puruṣottama |
bhūtabhāvana bhūteśa devadeva jagatpate || 10.15||

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।

याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १०.१६ ॥

vaktumarhasyaśeṣeṇa divyā hyātmavibhūtayaḥ |
yābhirvibhūtibhirlokānimāṁstvaṁ vyāpya tiṣṭhasi || 10.16||